# सुन्दरकाण्ड द्वाविंशः सर्गः (२२) - ॥ अवधि विधाणम् ॥

सीताया वचनं श्रुत्वा परुषं राक्षसाधिपः ।
प्रत्युवाच ततः सीतां विप्रियं प्रियदर्शनाम् ॥ १ ॥

यथा यथा सान्त्वयिता वश्यः स्त्रीणां तथा तथा ।
यथा यथा प्रियं वक्ता परिभूतस् तथा तथा ॥ २ ॥

सन्नियच्छति मे क्रोधं त्वयि कामः समुत्थितः ।
द्रवतोऽमार्गमासाद्य हयानिव सुसारथिः ॥ ३ ॥

वामः कामो मनुष्याणां यस्मिन्किल निबध्यते ।
जने तस्मिंस् त्वनुक्रोशः स्नेहश्च किल जायते ॥ ४ ॥

एतस्मात् कारणान्न त्वां घातयामि वरानने ।
वधार्हा मवमानार्हां मिथ्या प्रव्रजिते रताम् ॥ ५ ॥

परुषाणीह वाक्यानि यानि यानि ब्रवीषि माम् ।
तेषु तेषु वधो युक्तस् तव मैथिलि दारुणः ॥ ६ ॥

एवमुक्त्वा तु वैदेहीं रावणो राक्षसाधिपः ।
क्रोध संरम्भ सम्युक्तः सीता मुत्तर मब्रवीत् ॥ ७ ॥

द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृतः ।
ततः शयन मारोह मम त्वं वरवर्णिनि ॥ ८ ॥

ऊर्ध्वं द्वाभ्यां तु मासाभ्यां भर्तारं मामनिच्छतीम् ।
मम त्वां प्रात राशार्थ मालभन्ते महानसे ॥ ९ ॥

तां तर्ज्यमानां सम्प्रेक्ष्य राक्षसेन्द्रेण जानकीम् ।
देव गन्धर्व कन्यास्ता विषेदुर् विकृतेक्षणाः ॥ १० ॥

ओष्ठ प्रकारै रपरा वक्त्रैर् नेत्रैस् तथाऽपराः ।
सीता माश्वासया मासुस् त्रिजिताम् तेन रक्षसा ॥ ११ ॥

ताभि राश्वासिता सीता रावणं राक्षसाधिपम् ।
उवाचात्म हितं वाक्यं वृत्त शौण्डीर्य गर्वितम् ॥ १२ ॥

नूनं न ते जनः कश्चि दस्ति निःश्रेयसे स्थितः ।
निवारयति यो न त्वां कर्मणोऽस्माद् विगर्हितात् ॥ १३ ॥

मां हि धर्मात्मनः पत्नीं शचीमिव शचीपतेः ।
त्वदन्यस्त्रिषु लोकेषु प्रार्थयेन् मनसापि कः ॥ १४ ॥

राक्षसाधम रामस्य भार्याममिततेजसः ।
उक्तवानसि यच्छापं क्व गतस् तस्य मोक्ष्यसे ॥ १५ ॥

यथा दृप्तश्च मातङ्गः शशश्च सहितो वने ।
तथा द्विरदवद् रामस्त्वं नीच शशवत् स्मृतः ॥ १६ ॥

स त्वमिक्ष्वाकु नाथं वै क्षिपन् निह न लज्जसे ।
चक्षुषोर्विषयं तस्य न तावदुपगच्छसि ॥ १७ ॥

इमे ते नयने क्रूरे विरूपे कृष्णपिङ्गले ।
क्षितौ न पतिते कस्मान् मामनार्य निरीक्षतः ॥ १८ ॥

तस्य धर्मात्मनः पत्नीं स्नुषां दशरथस्य च ।
कथं व्याहरतो मां ते न जिह्वा व्यवशीर्यते ॥ १९ ॥

असन्देशात्तु रामस्य तपसश् चानुपालनात् ।
न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह तेजसा ॥ २० ॥

नापहर्तु महं शक्या तस्या रामस्य धीमतः ।
विधिस्तव वधार्थाय विहितो नात्र संशयः ॥ २१ ॥

शूरेण धनद भ्रात्रा बलैः समुदितेन च ।
अपोह्य रामं कस्माद्धि दार चौर्यं त्वया कृतम् ॥ २२ ॥

सीताया वचनं श्रुत्वा रावणो राक्षसाधिपः ।
विवृत्य नयने क्रूरे जानकी मन्व वैक्षत ॥ २३ ॥

नील जीमूत सङ्काशो महाभुज शिरोधरः ।
सिंह सत्त्व गतिः श्रीमान् दीप्त जिह्वाग्र लोचनः ॥ २४ ॥

चलाग्र मुकुट प्रांशुश् चित्र माल्यानु लेपनः ।
रक्त माल्याम्बर धर स्तप्ताङ्गद विभूषणः ॥ २५ ॥

श्रोणी सूत्रेण महता मेचकेन सुसंवृतः ।
अमृतोत्पाद नद्धेन भुजगेनेव मन्दरः ॥ २६ ॥

द्वाभ्यां स परिपूर्णाभ्यां भुजाभ्यां राक्षसेश्वरः ।
शुशुभेऽचल सङ्काशः शृङ्गाभ्या मिव मन्दरः ॥ २७ ॥

तरुणादित्य वर्णाभ्यां कुण्डलाभ्यां विभूषितः ।
रक्त पल्लव पुष्पाभ्या मशोकाभ्या मिवाचलः ॥ २८ ॥

स कल्प वृक्ष प्रतिमो वसन्त इव मूर्तिमान् ।
श्मशान चैत्य प्रतिमो भूषितोऽपि भयङ्करः ॥ २९ ॥

अवेक्षमाणो वैदेहीं कोप संरक्त लोचनः ।
उवाच रावणः सीतां भुजङ्ग इव निःश्वसन् ॥ ३० ॥

अनयेनाभि सम्पन्न मर्थहीन मनुव्रते ।
नाशयाम् यह मद्य त्वां सूर्यः सन्ध्या मिवौजसा ॥ ३१ ॥

इत्युक्त्वा मैथिलीं राजा रावणः शत्रु रावणः ।
सन्दिदेश ततः सर्वा राक्षसीर्घोर दर्शनाः ॥ ३२ ॥

एकाक्षी मेक कर्णां च कर्ण प्रावरणां तथा ।
गोकर्णीं हस्तिकर्णीं च लम्बकर्णी मकर्णिकाम् ॥ ३३ ॥

हस्तिपाद्यश्व पाद्यौ च गोपादीं पादचूलिकाम् ।
एकाक्षी मेकपादीं च पृथुपादी मपादिकाम् ॥ ३४ ॥

अतिमात्र शिरोग्रीवा मतिमात्र कुचोदरीम् ।
अतिमात्रास्य नेत्रां च दीर्घ जिह्वा मजिह्विकाम् ॥ ३५ ॥

अनासिकां सिंहमुखीं गोमुखीं सूकरी मुखीम् ।
यथा मद्वशगा सीता क्षिप्रं भवति जानकी ॥ ३६ ॥

तथा कुरुत राक्षस्यः सर्वाः क्षिप्रं समेत्य च ।
प्रतिलोमानु लोमैश्च सामदानादि भेदनैः ॥ ३७ ॥

आवर्जयत वैदेहीं दण्डस् योद्यमनेन च ।
इति प्रति समादिश्य राक्षसेन्द्रः पुनः पुनः ॥ ३८ ॥

काममन्यु परीतात्मा जानकीं पर्य तर्जयत् ।
उपगम्य ततः क्षिप्रं राक्षसी धान्य मालिनी ॥ ३९ ॥

परिष्वज्य दशग्रीव मिदं वचन मब्रवीत् ।
मया क्रीड महाराज सीतया किं तवानया ॥ ४० ॥

विवर्णया कृपणया मानुष्या राक्षसेश्वर ।
नूनमस्या महाराज न दिव्यान् भोग सत्तमान् ॥ ४१ ॥

विदधा त्यमर श्रेष्ठस्तव बाहु बलार्जितान् ।
अकामां कामयानस्य शरीर मुपतप्यते ॥ ४२ ॥

इच्छन्तीं कामयानस्य प्रीतिर् भवति शोभना ।
एवमुक्तस्तु राक्षस्या समुत्क्षिप्तस् ततो बली ॥ ४३ ॥

प्रहसन् मेघसङ्काशो राक्षसः स न्यवर्तत ।
प्रस्थितः स दशग्रीवः कम्पयन् निव मेदिनीम् ॥ ४४ ॥

ज्वलद् भास्कर वर्णाभं प्रविवेश निवेशनम् ।
देव गन्धर्व कन्याश्च नाग कन्याश्च सर्वतः ।
परिवार्य दशग्रीवं विविशुस्तद् गृहोत्तमम् ॥ ४५ ॥

स मैथिलीं धर्मपरा मवस्थितां
प्रवेपमानां परिभर्त्स्य रावणः ।
विहाय सीतां मदनेन मोहितः
स्वमेव वेश्म प्रविवेश भास्वरम् ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वाविंशः सर्गः
॥ २२ ॥